This document consists of three parts containing hymns on **Sri Surya** – **Sri Surya Mantra**, **Sri Surya Kavacham** and **Surya Stotra Rajam**. They are found in **Brahma Vaivarta Puranam**, **Ganapati Khanda**, **Chatper 19** (which describes the **Surya Pujavidhi** especially in **Pushkar Kshetra** – a holy pilgrimage center in Rajasthan near Ajmer).

## Surya Mantra

The second line of this hymn introduces a very rare and potent mantra on Lord Surya – **OM hrIM namo bhagavate sUryAya paramAtmane svAhA**. One who worships Lord Surya with a **Shodasopachara Puja** and this mantra for a year becomes completely relieved of all diseases and illnesses.

## Surya Kavacham

The rare Surya Kavacham (titled **Jagad Vilakshana Surya Kavacham**) that follows the above mantra is said to be very potent and given by **Brihaspati** to **Indra** when he was cursed by **Sage Gautama** for having illicit relationship with Sage's wife **Ahalya**. This Kavacha was originally given to **Manu** by **Sage Pulastya** at **Pushkar**.

One who chants this Kavacham gets complete cure from all diseases and begets all wealth. The mere chanting of this Kavacham gives the benefit of eating **Havishyannam** (cooked rice offered to Gods in **Homas**) for ten lakh years. One who worships **Lord Bhaskara** without knowing this Kavacham will not attain Siddhi even if chants mantras for a million times.

## Surya Stotra Rajam

The short prayer hymn that follows the Kavacham is titled **Stotra Rajam** (or a royal praise or King of Prayers) and is considered to be the most sacred. This Kavacham is according to **Sama Veda**.

One who chants this stotram thrice a day gets complete cure from deadliest of diseases like leprosy, blindness, Small/Chicken pox, etc. if he eats Havishyanna for a month along with this prayer. This also gives the benefit of bathing in all holy waters.

ब्रह्मोवाच -

कृत्वा त्रिकालं स्नानं च मन्त्रेणानेन भास्करम् ।
संसेव्य भास्करं भक्त्या नीरुजौ च भविष्यथः ॥ १ ॥

ॐ ह्रीं नमो भगवते सूर्याय परमात्मने ।
स्वाहेत्यनेन मन्त्रेण सावधानं दिवाकरम् ॥ २ ॥

संपूज्य दत्त्वा भक्त्या वै चोपहारांस् तु षोडश ।
एवं संवत्सरं यावद् ध्रुवं मुक्तौ भविष्यथः ॥ ३ ॥

अपूर्वं कवचं तस्य युवाभ्यां प्रददाम्यहम् ।
यद् दत्तं गुरुणा पूर्वं इन्द्राय प्रीति पूर्वकम् ॥ ४ ॥

तत् सहस्र भगाङ्गाय शापेन गौतमस्य च ।
अहल्या हरणेनैव पाप युक्ताय सङ्कटे ॥ ५ ॥

बृहस्पतिरुवाच -

इन्द्र शृणु प्रवक्ष्यामि कवचं परमाद्भुतम् ।
यद् धृत्वा मुनयः पूता जीवन् मुक्ताश् च भारते ॥ ६ ॥

कवचं बिभ्रतो व्याधिर् न भिया ऽऽ याति सन्निधिम् ।
यथा दृष्ट्वा वैनतेयं पलायन्ते भुजङ्गमाः ॥ ७ ॥

शुद्धाय गुरु भक्ताय स्वशिष्याय प्रकाशयेत् ।
खलाय परशिष्याय दत्त्वा मृत्युं अवाप्नुयात् ॥ ८ ॥

जगद् विलक्षणस्यास्य कवचस्य प्रजापतिः ।
ऋषिश् छन्दश् च गायत्री देवो दिनकरः स्वयम् ॥ ९ ॥

व्याधि प्रणाशे सौन्दर्ये विनियोगः प्रकीर्तितः ।
सद्यो रोग हरं सारं सर्व पाप प्रणाशनम् ॥ १० ॥

## ॥ विनियोगः ॥

**ॐ अस्य श्रीसूर्य कवच स्तोत्र महामन्त्रस्य । प्रजापति ऋषिः । गायत्री छन्दः । भगवान् दिनकरो देवता । मम सकुटुंभस्य वर्तमान वर्तिष्यमाण सकल व्याधीनां प्रणाशनार्थे सकल सौन्दर्याणां अवाप्त्यर्थे जपे विनियोगः ॥**

## ॥ श्रीसूर्य कवचम् ॥

ॐ क्लीं ह्रीं श्रीं श्रीसूर्याय स्वाहा मे पातु मस्तकम् ।
अष्टादशाक्षरो मन्त्रः कपालं मे सदाऽवतु ॥ १ ॥

ॐ ह्रीं ह्रीं श्रीं श्रीं सूर्याय स्वाहा मे पातु नासिकाम् ।
चक्षुर् मे पातु सूर्यश् च तारकं च विकर्तनः ॥ २ ॥

भास्करो मे ऽ धरं पातु दन्तान् दिनकरः सदा ।
प्रचण्डः पातु गण्डं मे मार्त्ताण्डः कर्णं एव च ॥ ३ ॥

मिहिरश् च सदा स्कन्धे जङ्घे पूषा सदाऽवतु ॥ ४ ॥

वक्षः पातु रविः शश्वन् नाभिं सूर्यः स्वयं सदा ।
कङ्कालं मे सदा पातु सर्व देव नमस्कृतः ॥ ५ ॥

कर्णौ पातु सदा ब्रध्नः पातु पादौ प्रभाकरः ।
विभाकरो मे सर्वाङ्गं पातु सन्ततं ईश्वरः ॥ ६ ॥

## ॥ फलश्रुतिः ॥

इति ते कथितं वत्स कवचं सुमनोहरम् ।
जगद् विलक्षणं नाम त्रिजगत्सु सुदुर्लभम् ॥ ७ ॥

पुरा दत्तं च मनवे पुलस्त्येन तु पुष्करे ।
मया दत्तं च तुभ्यं तद् अस्मै कस्मै न देहि भोः ॥ ८ ॥

व्याधितो मुच्यते त्वं च कवचस्य प्रसादतः ।
भवान् अरोगी श्रीमांश् च भवैष्यति न संशयः ॥ ९ ॥

लक्ष वर्ष हविष्येन यत् फलं लभते नरः ।
तत् फलं लभते नूनं कवचस्यास्य धारणात् ॥ १० ॥

इदं कवचं अज्ञात्वा यो मूढो भास्करं यजेत् ।
दश लक्ष प्रजप्तोऽपि मन्त्र सिद्धिर् न जायते ॥ ११ ॥

ब्रह्मा उवाच -

धृत्वेदं कवचं वत्सौ कृत्वा च स्तवनं रवेः ।
युवां व्याधि विनिर्मुक्तौ निश्चितं तु भविष्यथः ॥ १२ ॥

स्तवनं साम वेदोक्तं सूर्यस्य व्याधि मोचनम् ।
सर्व पाप हरं सारं धना ऽ रोग्य करं परम् ॥ १३ ॥

## ॥ श्रीसूर्य स्तुति ॥

ब्रह्मोवाच -

तं ब्रह्म परमं धाम ज्योती रूपं सनातनम् ।
त्वामहं स्तोतुं इच्छामि भक्त्या ऽ नुग्रह कारकम् ॥ १ ॥

त्रैलोक्य लोचनं लोक नाथं पाप विमोचनम् ।
तपसां फल दातारं दुःखदं पापिनां सदा ॥ २ ॥

कर्माऽनुरूप फलदं कर्म बीजं दयानिधिम् ।
कर्मरूपं क्रियारूपं अरूपं कर्म बीजकम् ॥ ३ ॥

ब्रह्म विष्णु महेशान अंशं च त्रिगुणात्मकम् ।
व्याधिदं व्याधि हन्तारं शोक मोह भयाऽपहम् ॥ ४ ॥

सुखदं मोक्षदं सारं भक्तिदं सर्व कामदम् ॥ ५ ॥

सर्वेश्वरं सर्वरूपं साक्षिणं सर्व कर्मणाम् ।
प्रत्यक्षं सर्व लोकानां अप्रत्यक्षं मनोहरम् ॥ ६ ॥

शश्वद् रस हरं पश्चाद् रसदं सर्व सिद्धिदम् ।
सिद्धि स्वरूपं सिद्धेशं सिद्धानां परमं गुरुम् ॥ ७ ॥

## ॥ फलश्रुतिः ॥

स्तवराजं इमं प्रोक्तं गुह्याद् गुह्य तरं परम् ।
त्रिसन्ध्यं यः पठेन् नित्यं व्याधिभ्यः स प्रमुच्यते ॥ ८ ॥

आन्ध्यं कुष्ठं च दारिद्र्यं रोगः शोको भयं कलिः ।
तस्य नश्यति विश्वेश श्रीसूर्य कृपया ध्रुवम् ॥ ९ ॥

महाकुष्ठी च गलितो चक्षुर्हीनो महाव्रणी ।
यक्ष्म ग्रस्तो महाशूली नाना व्याधि युतोऽपि वा ॥ १० ॥

मासं कृत्वा हविष्यान्नं श्रुत्वाऽतो मुच्यते ध्रुवम् ।
स्नानं च सर्व तीर्थानां लभते नाऽत्र संशयः ॥ ११ ॥

---

**॥ इति श्रीब्रह्म वैवर्ते महापुराणे गणपति खण्डे श्रीसुर्य कवचं एव स्तोत्रं सम्पूर्णम् ॥**